GURUNATHA-PARAMARSA

(OF MADHURAJA)

Edited by

P. N. PUSHP

Research & Publication Deptt
J. & K. GOVERNMENT
SRINAGAR (Kashmir)

GURUNATHA-PARAMARSA

(OF MADHURAJA)

(A Poetic Tribute to Abhinavagupta
by a pupil from Madurai)

Edited by

P. N. PUSHP

Research & Publication Deptt
J. & K. GOVERNMENT
SRINAGAR (Kashmir)

Published by
Research & Publication Deptt
J & K Govt, SRINAGAR (Kashmir)

First Edition : 1960
Price : 50 nP.

(Fronticepice :
The Ācārya in His Āśrama
(transcending time and space)
from a recent painting.

Courtesy :
Śrī Vidyadhara Śaiva Āśrama
Karan Nagar (SRINAGAR)

Printed at
The Kranti Press, JAMMU

GURUNATHA-PARAMARSA

OF MADHURAJA

KASHMIR SERIES OF TEXTS & STUDIES
No: 85

CONTENTS

1. PREFATORY i

2. TEXT (Sanskrit) 2

3. APPENDIX I 8
(Additional Verses)

4. APPENDIX II 11
(On Madhurāja)

GURUNĀTHA-PARĀMARŚA
OF MADHURĀJA

—o—

PREFATORY:

The text edited here is based on the following:

(a) Devanāgarī Transcripts:

(1) L: Kindly loaned out by Brahmacārī Rājānaka Lakṣmaṇa of the *Īśvara-Āśrama* (Ishabar), Srinagar. (Copied out by him in 1925 from a Devanāgarī transcript belonging to a *gṛhasthī mahātmā* of Madras.)

(2) R: belonging to the Research Library, Srinagar. (Strictly speaking, just a copy of L retouched, here and there, by the late Sri M. S. Koul, Superintendent of the Department.)

(b) C: (Ms D No. 15323 of the Sanskrit College, Tripunittura, Cochin) as utilized by Dr V. Raghavan in his edition of the work, published in the JOR, Madras.

Now a collation of a and *b* reveals that neither can be regarded as completely authentic; the two versions appear to be complementary to each other. Only twenty-eight [1] verses are common to both. While eighteen[2] are peculiar to R (and L), C has an addition of nineteen.[3] Mysteriously enough both these addenda (to the common stock) are more or less characterized by specific references to *Abhinavagupta*. Thus, out of the eighteen peculiar to a, only two stanzas (Nos 1 and

1. Nos: 7, 8, 10-32 and 34-36
2. Marked * in the the text, here.
3. Cf App. 1

33) do not explicitly mention *Abhinava*, though the allusion is there. Of the remaining stanzas, Nos: 2-6, 9, 37 and 38 mention him as *Abhinava* or *Gurunātha*; Nos: 39-44 mention *Mādhura* or *Madhurāja*, the poet; while Nos: 45 and 46 mention both the preceptor and the pupil.

Similarly nine [4] out of the nineteen verses peculiar to C refer to *Abhinava-Bhāratī* : his celebrated commentary on the *Nāṭyaśāstra* of *Bharata*. Of the remaining ten very few have a direct bearing on the poem itself. Have these been drawn from some other work or works by the poet ? Or, even wrongly ascribed to him by some early copyist ? No categorical statement on this point is possible as long as a more complete Ms of the work is not discovered.

Anyway, the present version is published in the hope that it positively records a further step in the direction of establishing the text of the original poem by *Madhurāja* of Madhurā (modern Madurai), and also throws some light on Kashmir's cultural and intellectual intercourse even with very remote parts of our country.

Our grateful aknowledgements are due to Brahmachari Rajanaka Lakshmana for readily placing his transcript at our disposal, and to Dr V. Rāghavan whose edition we have profitably consulted and quoted.

Srinagar,
Aug. 15,'60.

—P. N. Pushp

---

4. Nos : 1-9 (App. I)

Plate No. II



Abhinavaguptācārya
(: the Gurunātha)
[Tenth Century A. D.]

अथ

मधुराजयोगिविरचितः

श्री गुरुनाथपरामर्शः

—०—

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः[1] प्रथमः ॥१॥ ❀
श्रीवसुगुप्तमहागुरु-सोमानन्दप्रभूत्पलाचार्यान् ।
अभिनवगुप्तं नाथं वन्दे श्रीक्षेमराजञ्च ॥२॥ ❀
द्राक्षारामस्य मध्ये स्फटिकमणिमये मण्डपे चित्ररम्ये
पुष्पस्रग्धूपदीपैर्बहुलपरिमले चर्चिते चन्दनाद्यैः ।
वाद्यैर्गीतैः सनृत्तैः सततमुखरिते योगिनीसिद्धसङ्घै-
राकीर्णे स्वर्णपीठे मृदुतमविलसद्बद्धमुक्ताविताने ॥३॥ ❀

आसीनः क्षेमराजप्रभृतिभिरखिलैः
सेवितः शिष्यवर्गैः
पादोपान्ते विषण्णैरवहितहृदयै-
रुक्तमुक्तं लिखद्भिः ।
द्वाभ्यां पार्श्वस्थिताभ्यां शिवरस-
[सरकं[2]] पूर्णताम्बूलपेटीं
दूतीभ्यां बिभ्रतीभ्यामपरकरलस-
न्मातुलुङ्गोत्पलाभ्याम् ॥४॥ ❀

आनन्दादोलिताक्ष[:][3] स्फुटकृततिलको भस्मना भालमध्ये
रुद्राक्षोल्लासिकर्णः कलितकचभरो मालया लम्बकूर्चः ।
रक्ताङ्गो यक्षपङ्क्तोल्लसदसितगलो लम्बमुक्तोपवीतः
क्षौमं वासो वसानः शशिकरधवलं वीरयोगासनस्थः ॥५॥ ❀

---

*Verses peculiar to R (& L);

1. दैशिकः (L); 2. करकं (R & L); 3. -ताक्षस्फुट (R & L).

जान्वासक्तैकहस्तः स्फुटपरमशिवज्ञानमुद्राक्षसूत्रो
वामश्रीपाणिपद्मस्फुरितनखमुखैर्वादयन्नादवीणाम् ।
श्रीकण्ठेशावतारः परमकरुणया प्राप्तकश्मीरदेशः
श्रीमान्नः पातु साक्षादभिनववपुषा दक्षिणामूर्तिदेवः ॥६॥ ❀

यत् सारस्वत[रस[1]] सिद्ध एव शुद्धः
सर्वोऽध्वा[2] विलसति वाच्यवाचकात्मा ।
काश्मीरो[3] जयति जगद्धितावतारः
स श्रीमानभिनवगुप्तदेशिकेन्द्रः ॥७॥ ❀

अभिनवगुरुसारस्वतपरमरसास्वादमोदमानानाम् ।
अमृतमपि दत्तममरैररुचिकृदस्माकमारनालमिव ॥८॥

अभिनवगुरुसारस्वतपर्वतशिखराधिरूढहृदयानाम् ।
मातङ्गवदतितुङ्गं मशकवदाभात्यधःस्थितं सकलम् ॥९॥

अभिनवगुरुसारस्वतपरिमलबहुला[4]धिवासिते जगति ।
सङ्क्रन्दनोऽपि निन्दति नन्दनहरिचन्दनामोदम् ॥१०॥

अभिनवगुरुसारस्वतचन्द्रातपचर्चिते जगति ।
कथमिव तमःकथा वा तापकथा वा प्रगल्भते स्थातुम् ॥११॥

अभिनवगुरुसारस्वतरसवेधितहृदयधातूनाम्[5] ।
प्रसृमरषोडशवर्णकसौवर्णमयं प्रकाशते विश्वम् ॥१२॥

अभिनवगुरुसारस्वतमार्तण्डमरीचिपरिचयोन्निद्रे ।
हृत्पुण्डरीककुहरे निवसति नियमेन मोक्षलक्ष्मीर्नः ॥१३॥

अभिनवगुरुमुखपद्मप्रसृतशिवाद्वैतशीधुशील[नया[6]] ।
प्रशमित[7]पाशवशासनशङ्कातङ्का सुखेन विहरामः ॥१४॥

---

1. -स्वतसिद्ध ((R & L); -स्वतरससिद्ध (C); 2. ऽद्धा (C);
3. काश्मीरी (C); 4. बहुला-(C); 5. धातृणाम्;
6. शीलनद्या (R), शीलायाः (L); 7. पाशवशासौ चिन्ता (C).

निजहृदयकुहरनिहितस्फुरदभिनवगुप्तवाङ्मयधनानाम्[8] ।
अस्माकमात्मविदुषामव्याहतमेव सहजमैश्वर्यम् ॥१५॥

अभिनवपरमेश्वरप्रसादात्
स्वहृदयसंनिहितात्मदेवतानाम् ।
जडघटपटताम्रकाञ्चनाश्म—
प्रभृतिषु न प्रतिमासु पूजनास्था ॥१६॥

अभिनवपरमेश्वरप्रसादा-[9]
दपगतभौतिकविग्रहाग्रहाणाम् ।
परधनहरणादिपापचिन्ता
परपुरुषाणि वचांसि वा कथं स्युः ॥१७॥

सिद्धान्तवामभैरवयामलकौलत्रिकैकवीरविदाम् ।
अभिनवगुप्तः श्रीमानाचार्यपदे स्थितो जयति ॥१८॥

यो मेलने क्वचन देशिकयोगिनीना-
मद्यप्रभृत्यखिल एष गुरुक्रमौघः ।
त्वय्येव सङ्क्रमित इत्युपलालितो भू-
त्तस्मै नमोऽभिनवगुप्तगुरूत्तमाय ॥१९॥

पर्यन्तसंपदुपपादनकल्पवल्ली
पञ्चाशिका परमकारुणिकेन येन ।
प्रोक्ता त्विह[10]द्वयनये जनतां[11] नियोक्तुं
तस्मै नमोऽभिनवगुप्तगुरूत्तमाय ॥२०॥

ग्रन्थं[12] कथामुखमहातिलकाभिधानं[12a]
न्यायोक्तषोडशपदार्थनिरूपणाभिः ।

---

8. धनानाम् (C); 9. वीराणाम् (C); 10. निजा (C);
11. ञ्जनतां (C); 12. ग्रन्थः (C), obviously corrupt;
12a. —धानः (C).

यो वादिनां व्यरचयद्विजयाय वादे
तस्मै नमोऽभिनवगुप्तगुरूत्तमाय ॥२१॥

अभिनवगुप्तनाथलिखितं लिखितं हृदये
तदितरशास्त्रकारलिखितं लिखितं सलिले ।
स्वहृदयदेवतामुखहुतं हुतमग्निमुखे
तदितरदेवतासु निहितं निहितं भसिते ॥२२॥

श्रीमानभिनवगुप्तः[13] सत्यं श्रीकण्ठनाथ एवेति ।
प्रतिपद्यतामितरथा व्याख्यातृत्वं कथं भवेदित्थम् ॥२३॥

अभिनवसहकारमञ्जरीयं मधुमधुरं निजसौरभं वमन्ती ।
रसयति नहि केवलं वसन्तं सकलमतीतमनागतञ्च कालम् ॥२४॥

अभिनवगुप्तमुखेन्दोरमृतकलोल्लासिसुन्दरादुदिता ।
ज्ञानेन्दुकौमुदी नः पूर्णं पुष्णातु शिव [भोगम्][14] ॥२५॥

अञ्जनेन हृदये ममाञ्जिते
भञ्जनेन भववासनारुजाम् ।
दृश्यतेऽभिनवगुप्तदेशिकः
सञ्चितः शिवनिधिः पदे पदे ॥२६॥

गुरवे नमो गुरूणामभिनवगुप्ताय वृद्धवैद्याय[15] ।
विश्वशिवाद्वयशीलनविध्युपदेशोपशामितविश्वरुजे ॥२७॥

अभिनवगुप्तदेशिक[16] मुखोद्गतसूक्तिसुधासुरतटिनी ।
प्रवाहलहरीलवमात्रमपि श्रुतिसरणिं पवित्रयति
यस्य स एव कृती[17] ॥२८॥

---

13. गुप्ताचार्यः (C);
14. or [योगम्]; भोगम् (C); शिवदोगम् (L); शिवाद्वयोद्योगम् (R);
15. मेद्याय (L); 16. दैशिकः (L);
17. C adds यदि हृदयं प्रविष्टमथ किं शिव एव हि सः ।

मधुरा[18] महेश्वकथामकरन्दधुनी
परिमलमज्जनध्वनिपवित्रितभक्तजना ।
अभिनवगुप्तनाथवदनाम्बुजवाग्भ्रमरी
शिव शिव गाढं[19] मूढमपि मां मुखरीकुरुते ॥२९॥

अभिनवगुप्तयुक्तिपरिशीलनपाटवत-
स्त्रुटितसमस्तसंशयतमःपटले हृदये ।
मुकुर[20] इवाभाति मुखमण्डल[21]मखण्डमिदं
यदि[22] हृदयं प्रविष्टमप्य किं शिव एव हि सः ॥३०॥

मनसैव गम्यते या परिपन्थिन एव पालका यस्याम् ।
प्रतिपदविश्रान्तिमयी पद्धतिरियमभिनवा जयति ॥३१॥

चमत्कुर्वन्तु मां सर्वे न्यक्कुर्वन्त्वथवा बुधाः ।
न मद्गुर्वधिकः कश्चिद्विपश्चिच्छिवनिश्चये ॥३२॥

व्याप्तः परे नभसि भाति रवीन्दुयोगा-
न्मध्येपथं महति तेजसि दीप्यमाने ।
महेशिकः[23] परमकारुणिकः पुनर्मे
चिद्देवतावपुरसौ हृदये चकास्ति ॥३३॥❀

दत्तक्षणेन भविनां[24] मलजालशुद्धौ
सिद्धौषधेन गुरुनाथनिरीक्षणेन ।

विद्धः क्षणेन यदहं निजहृद्गुहायां
सौवर्णपूर्णसकलावयवोऽस्मि तस्मात् ॥३४॥

---

18. मधुरं (C); 19. गाढमूढम्-(as emended by Dr V. Raghavan);
20. मुकुरा (C); 21. —मण्डम्—(C); 22. L gives this line as the first of the stanza while C adds it on to V 28, rearranging the verse into a KOKILAKA stanza (of 4 lines); 23. दैशिकः (L); 24. भविना (L).

वस्तुनि वस्तुनि योऽसौ निवसति कार्त्स्न्येन कार्त्स्न्येन ।
विस्मयनिधये तस्मै नमो नमः श्रीमते गुरवे ॥३५॥

गुरुरेव शिवः शिवत्वदायी
न परः कर्मवशेन भोगदाता ।
शिव एव गुरुः कृपात्तमूर्त्तिः
पशुपाशच्छिदिहान्यथा कथं स्यात् ॥३६॥

अभिनवोत्पलसौरभसंस्कृतं
रसयतः *शिवदृष्टि*रसायनम् ।
इह सदैव सदैव निरामयं
हृदयमस्तु मम प्रतिभामयम् ॥३७॥❀

चतुरधिकसप्ततितमे वर्षे मम वर्तमानेऽस्मिन् ।
पितुरधिगतमपि बाल्येऽप्यभिनवमिव भाति गुप्तमध्यापि ॥३८॥

विस्तीर्णसद्गुरुपदस्मरणप्लवेन
निस्तीर्णभीमतरभैरवधीप्रवाहः ।
अद्याष्टसप्ततितमे वयसीह वर्ते
वाचा सुधारसमुचा सह *माधुरो*ऽहम् ॥३९॥❀

शक्तित्रयैकशरणे पराक्रमाक्रान्तविश्वादिकचक्रे ।
मधुराजे मयि जीवति अनश्वरं नूनमीश्वराद्वैतम् ।४०॥❀

दण्डकमण्डलुकर्परकन्था-
मात्रपरिच्छदगात्रकुटुम्बः ।
खण्डनमण्डनतुल्यमतिः सन्
वीरमते रमते *मधुराजः* ॥४१॥❀

कक्षारोपितभिक्षः[25] कर्परकन्था कमण्डलुर्दण्डी ।
रक्षावगुण्ठिततनुर्व्याख्यायतनेषु *माधुरश्चरति* ॥४२॥❀

---

25. भिक्षातत्परकन्था (L).

नवनवगद्यपद्यमयसूक्तिसहस्रसुधारस—
घनसारसौरभवशीकृतविश्वधियः ।
अविरतमुन्मिषन्तु हृदये हृदये विदुषां
शिवपदकिङ्करस्य *मधुराज*कवेः कृतयः ॥४३॥❀

परचिदमृतपायी पंचकृत्यानपायी
पशुपतिपददायी पार्वती संप्रदायी ।
जितकरणनिकायो नित्यनीरोगकायो
विहरति *मधुराजो* योगिनां राजराजः ॥४४॥❀

मधुर*माधुर*भाषितभूषिता
सहृदयश्रुतिपद्धतिरुद्धता ।
*अभिनवै*र्नवभिर्भरितं रसै-
रमृतमुद्गमति स्वकजिह्वया ॥४५॥❀

शिवहृदयनराजीवान्मधुरं *मधुराज*वदनराजीवात् ।
*अभिनव*रसभरितं सारं सारस्वतं मधु स्रवति ॥४६॥❀

इति महायोगीश्वर-मधुराज-कवि-विरचितः
श्रीगुरुनाथ परामर्शः

समाप्तः

APPENDIX I

Additional Verses According to *MS* C (as edited by Dr V. Raghavan).

—:o:—

1. स्वच्छन्दप्रसृमरगद्यपद्यविद्या-
वैशद्यप्रकटिततत्त्वरागमार्थाः ।
पाशच्छित्परमशिवाद्वयोपदेशैः
पान्त्वस्मानभिनवगुप्तपादाः ॥१॥

2. तर्षं यश्शमयति वाङ्मयोघवर्षैः
भक्तानां भवमरुमार्गचङ्क्रमोत्थम् ।
हर्षं वः प्रदिशतु सच्चिदम्बरस्थः
स श्रीमानभिनवगुप्तकालमेघः ॥२॥

3. सङ्कोचं दलयति हृत्सरोरुहाणां
गोभिर्यस्सकलदिगन्तसर्पिणीभिः ।
आलोकं दिशतु दृशामलौकिकं नः
स श्रीमानभिनवगुप्तनाथसूर्यः ॥४॥

4. यस्तापं हरति तमांसि च स्वभासा
स्वच्छात्मा सकलकलाकलापपूर्णः ।
आनन्दं दिशतु दृशाममन्दमन्तः
स श्रीमानभिनवगुप्तनाथचन्द्रः ॥५॥

5. एकद्वयाद्ययुगपक्षपरप्रमाणैः
संक्षेपविस्तरकृतैर्वचसां प्रबन्धैः ।
योऽन्वग्रहीत स सुकुमारसुसूक्ष्मबुद्धिः
तस्मै नमोऽभिनवगुप्तगुरूत्तमाय ॥६॥

6. षट्त्रिंशदाह्निकमितं भरतोक्तनाट्य-
वेदं रसैरुपचितं नवभिर्विवृण्वन् ।
यो भारतीमभिनवां रचयाञ्चकार
तस्मै नमोऽभिनवगुप्तगुरूत्तमाय ॥ १० ॥

7. दिशि दिशि विहराम्यहं वीतशंकाकलंकस्सुखं
भगवति परमेश्वरेऽनुत्तरे भक्तिमात्मनि ।
स्फुरदभिनवगुप्तनाथाननाम्भोजवाग्वाहिनी-
रसपरिमलमज्जनोन्मज्जनानन्दलीलापरः ॥३०॥

8. महामहेश्वरश्रीमदाचार्याभिनवोक्तयः ।
हृदये प्रतितिष्ठन्तु प्रतिष्ठन्तां पशूक्तयः ॥३१॥

9. सदाभिनवगुप्तवागभृतपानगोष्ठीरसात्
पराकृतसमस्तपाशवविकल्पनाविप्लवम् ।
मम त्वयि निवेशितं मयि तवापि मग्नं मनः
परस्पररसास्पदं भुवि परेश संपद्यताम् ॥ ३३ ॥

10. इष्टपोषणमनिष्टसंभृतशोषणं तदुभयात्मकं वरम् ।
वारि वह्निमयमर्थिने ददद् देव एव वरदो
महान् भवान् ॥ ३४ ॥

11. या चिदुल्लसति विश्व-सत्तया सा शिवोऽहमिति
विश्वसत्तया ।
आकलय्य सकृदेव मुच्यते देशिकैरसकृदेवमुच्यते
॥ ३८ ॥

12. अन्तस्थोर्ध्वज्वलनकलयात्यूष्मलं शैवसिद्धं
यत्तज्ज्योतिःपदमुदयतो वाङ्मयं प्रस्तुकामः ।
स्वोन्मेषोर्मिस्फुरितभरितानुत्तरानन्दसान्द्रं
पश्यन्तस्मिन् परमकवयः पाणिने सद्यसूत्रे ॥ ३९ ॥

13 विश्वं तुरीये चित्सूत्रे वाक्छक्त्यात्मनि गुम्फितम् ।
इत्युपादिक्षदस्माकं पाणिनिः परमो गुरुः ॥ ४० ॥

14. अस्पृष्टपूर्वोत्तरकर्मयोगमिदं कृतं पश्चिममेव येन ।
तद्दक्षिणीकृत्य शिवाय तस्मै निवेदितं मे गुरवे
शरीरम् ॥ ४१ ॥

15. जीवन्नेव शिवोऽस्मि सद्गुरुगिरा ज्ञानक्रियाशक्तिभिः
ज्ञानेन प्रतिपादितेन जनवत् सञ्चेष्टमानोऽप्यहम् ।
प्रारब्धाखिलपूर्वकर्मसदसद्भोगोपभोगक्षयात्
देहेऽस्मिन् पतिते चराचरजगत्स्वात्मा स एवेश्वरः
॥ ४३ ॥

16. श्रीमद्देशिकदृक्कटाक्षलहरीसंघट्टमात्रद्रुट-
न्मायीयाणवकामपाशपटलस्पष्टीभवद्दृष्टयः ।
स्वच्छस्वात्मविमर्शदर्पणतले विश्वं विमृश्य स्फुर-
त्स्वेच्छासंहृतिसर्गकेलिरसिकाः स्वैरं चरामो वयम्
॥ ४४ ॥

17 देशिकवागुपदेशविनश्यद्देहमरुन्मतिशून्यविकल्पो ।
अद्वयबोधविमर्शमयस्सन्नद्य शिवोऽस्मि शिवोऽस्मि
शिवोऽस्मि ॥ ४५ ॥

18. न वेदवेदाङ्गपरिश्रमो मे न तर्कशिक्षा न च कार्यशिक्षा ।
तथापि तावत् परिमार्ष्टि मौढ्यं गुरूपदेशयति-
पत्तिदार्ढ्यम् ॥ ४६ ॥

19. जाणं काणं कुणंतो णं जीवंताणंशि(सि)वत्तणम् ।
वाचाहीणो विआजेणं (ण) नि(ण)च्चपुण्णो
स देशि(सि)ओ ॥४७॥

[येषां केषां कुर्वन्ननु जीवतां शिवत्वम् ।
वाचा हीनो व्याजेन (?)नित्यपूर्णस्स देशिकः ॥]

—:o:—

APP. II

A Note on Madhurāja

Madhurāja, the author of the **Gurunātha-Parāmarśa** was, according to his own statement, a **mādhura** : he hailed from **madhurā** (present-day Madurai in South India)). He was a *yogi* (:योगिनां राजराज:)[2] of the *Pāśupata* ?) *sampradāya*, and moved[3] from place to place without any personal belongings except a staff (दण्ड:), a water vessel (कमण्डलु:), an earthen bowl (कर्पर) and a patchwork blanket (कन्था). He was equally proficient[4] in *khaṇḍana* (: smashing false wisdom) and *maṇḍana* (: establishing truth). He appears to have been the author of a number of works (कृतय:) both in prose and verse, and his skill in versification is fairly corroborated by the present *praśasti* : his tribute to the *Ācārya* (: Preceptor) at whose feet he studied[5] the *Śaiva* doctrine for four years. He had approached him when he (: the pupil) was running the seventy-fourth year of his life. He looked[6] upon the great savant as **Dakṣiṇāmūrti** reborn in Kashmir. He seems to have been deeply impressed[7] by the

1 Cf. Verse 39; 2. Verse 44; 3. Verse 41 4. Verse 43;
5. Verse 38-39: 6. Verse 6; 7. Verse 37.

Āchārya's exposition of *Utpala's Śivadṛṣṭi*, perhaps presented by him in the (now lost) **Śivadṛṣṭi-locana.** Two other works of *Abhinava*, lost to us now, are mentioned by Madhurāja, namely: **Pañcāśikā**[8] and **Kathāmukhamahātilaka**[9]. Of these the latter is perhaps referred to by *Abhinava* himself in his **Parātrimśikā**[10], while the former is a new name. Dr Raghavan rightly identifies[11] it with **Paryanta-pāñcāśikā.**

Finally a word about the *forte* of the **Parāmarśa** : The pen-portrait [12] of *Abhinavaguptācārya* in the arcadian *melieu* of his *āśrama* lit up by his spiritual radiance is so vivid and superb, and gives a convincing peep into the integrated porsonality of the great *Ācārya.*

—*P. N. Pushp*

●

8. Verse 20; 9. Verse 21; 10. K.T.S. 18, p 138; p 334;
11. JOR, Madras XIV, 12. Veses 3-6.